**निकुच्यकर्णि** अव्य० निकुच्यौ सङ्कुचितौ कर्णौ यत्र द्वि-
दण्ड्या० इच्समा० । सङ्कुच्यकर्णके

**निकुञ्चक** पु० नि+कुन्च–ण्वुल् । १कुडवपादे प्रस्थपरि-
माणे अमरः २वानीरभेदे जलवेतसे भावप्र० ।

**निकुञ्ज** पु०न० नितरां कौ जायते जन–ड पृषो० । लता-
दिपिहितोदरे कुञ्जे "कपिकुलमुपयाति क्लान्तमद्रेर्नि-
कुञ्जम्" ऋतुस० ।

**निकुञ्जिकाम्ला** स्त्री निकुञ्जस्तदुत्पत्तिस्थानत्वेनास्त्यस्या ठन्
कर्म० । कुञ्जवल्ल्याम् श्रीफलतुल्यगुणायां लतायाम्
राजनि० ।

**निकुम्भ** पु० नि+कुभि–अच् । १दन्तीवृक्षे २कुम्भकर्णराक्षस-
पुत्रभेदे च मेदि० । "स कुम्भश्च निकुम्भश्च कुम्भकर्णा-
त्मजावुभौ" रामा० लङ्का० ७५।४६ श्लो० । ३दानवभेदे
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा" भा०आ० ७५
अ० । प्रह्लादस्य ४पुत्रभेदे "प्रह्लादस्य त्रयः पुत्राः
ख्याताः सर्वत्र भारत! । विरोचनश्च कुम्भश्च निकु-
म्भश्चेति भारत!" भा०आ० ६०अ० । ५हर्य्यश्वनृप-
पुत्रे "हर्य्यश्वस्य निकुम्भोऽभूत् क्षात्रधर्मरतः
सदा" हरिवं० १२अ० । ६विश्वदेवभेदे "विश्वदेवास्तु
विश्वायां धर्माज्जाता इति श्रुतिः" इत्युपक्रमे "विश्वावसु-
र्मुपर्वाणौ निकुम्भश्च महायशाः" हरिवं० २०४ अ० ।
तत्र निकुम्भ इत्यत्र विष्कुम्भ इति पाठान्तरम् । ७कुरुसे-
नाधिपान्तर्गते नृपभेदे "दुःशासनो निकुम्भश्च कुण्डभेदी
पराक्रमी" भा०द्रो०१५६अ० । ८कुमारानुचरभेदे "शङ्कु-
कर्णौ निकुम्भश्च पद्मः कुमुद एव च" भा०श०४६अ० तत्-
सेनाध्यक्षोक्तौ । ९राक्षसेशे शिवानुचरभेदे "पार्श्वे
तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत् । राक्षसेश! पुरीं
गत्वा शून्यां वाराणसीं कुरु" हरिवं० २९अ० "अवेहि
मां किङ्करमष्टमूर्त्तेः कुम्भोदरं नाम निकुम्भमित्रम्" रघुः
१०दन्तीवृक्षे स्त्री गौरा० ङीष् वा राजनि० ।

**निकुम्भाख्यवीज** न० निकुम्भं दन्तिकाद्रुच्चवीजमाख्याति
स्ववीजेन आ+ख्या–क । जयपाले राजनि० ।

**निकुम्भित** न० नि+कुभि–क्त । नृत्यकरणभेदे "करणानान्तु
सर्वेषां सामान्यं लक्षणन्त्विदम् । प्रायो वामकरो वक्षः-
स्थितोऽन्यः पुरतोऽनुगः । पादाभ्यां करणं स्वेयं शत-
मष्टोत्तरं मतम्" इत्युपक्रमे "निकुम्भितं पार्श्वक्रान्त-
मतिक्रान्तं विवर्त्तनम्" सङ्गीतदा० ।

**निकुम्भिला** स्त्री लङ्कायाः पश्चिमभागस्थायां १गुहायां
२तत्रस्थदेव्याञ्च "मानुषं मांसमाहाद्य प्रनृत्यामो नि-
कुम्भिलाम्" रामा०सु०२४।४५ "निकुम्भिला नाम लङ्कायाः
पश्चिमभागवर्त्तिनी भद्रकाली तां तत्समीपं गत्वा प्रनृ-
त्यामः" इति तट्टीका । "तेन वीरेण तपसा वरदानात्
स्वयम्भुवः । अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुर-
ङ्गमाः । स एष किल सैन्येन प्राप्तः किल निकुम्भिलाम् ।
यद्युत्तिष्ठेत् कृतं कर्म हतान् सर्वांश्च विद्धि नः। निकुम्भि-
लामसंप्राप्तमकृतास्त्रं च यो रिपुः" रामा०लङ्का०८५।११श्लो०

**निकुरम्ब** न०नि+कुर–शब्दे बा० अम्बच् । समूहे अमरः ।
"अनिलतरलकिशलयनिकरेण करेण लतानिकुरम्बम्"
गीतगोविन्दम् ।

**निकुलीनिका** स्त्री निपाते "गतागतं प्रतिगतं चतुर्थं
निकुलीनिकाः" भा०क० ४८अ० । "निकुलीनिकाः नि-
पाताः" नीलकण्ठः ।

**निकूल** पु० नरमेधाङ्गे षष्ठयूपे पशुभेदालम्भोद्देश्ये देव-
भेदे "उत्कूलनिकूलाभ्यान्त्रिष्ठिनम्" यजु० ३०।१४।

**निकृत** त्रि०नि+कृ–क्त । १पराभूते २दूरीकृते ३शठे अमरः ।
४पतिते ५नीचे च मेदि० ।

**निकृति** स्त्री नि+कृ–भावे क्तिन् । १भर्त्सने २क्षेपे ३शाठ्ये
मेदि० ४दैन्ये शब्दरत्ना० "निकृतिपरेषु परेषु भूरिधाम्नः"
किरा० "निकृत्या कामये नाहं सुखान्युत धनानि वा"
भा०स० २०४ श्लो० । ५पृथिव्यां निघण्टुः । साध्यायां
धर्मस्य पुत्रे ६वसुभेदे "सप्तमस्तु ततो वायुरष्टमं निकृतिं
वसुम् । धर्मस्यापत्यमित्येवं साध्यायां वै व्यजायत"
हरिवं० २०४अ० । [अमरः ।

**निकृष्ट** त्रि० नि+कृष–क्त । अधमे जात्याचारादिनिन्दिते

**निकेचाय** पु० नि+चि–यङ् लुक्–घञ् "आदेश्च कः" इति
सूत्रे च कः इति वक्तव्ये आदेरित्युक्तियङ्लुक्यादेरेव
सि०कौ०उक्तेः आदेः चस्य कः । गोमयादीनां पुनःपुनः
राशीकरणे

**निकेत** पु० नि+कित–निवासे आधारे घञ् । १गृहे निकेतने
भरतः । "निकेतः श्रूयते पुण्यो यत्र विश्रवसो मुनेः"
भा०व० ८९अ० ।

**निकेतन** न० नि+कित–निवासे आधारे ल्युट् । १गृहे
अमरः "अरण्येऽनियमश्चैव वृक्षमूलनिकेतनः" मनुः ।
कर्मणि ल्युट् । २पलाण्डौ पु० शब्दच० ।

**निकोचक** पु० नि+कुच–शब्दे वुन् । अङ्कोटे अमरः अच्
निकोच-तत्रार्थे "निचुलमिचु निकोचकोरमाणप्रभृतीनि